International Journal of Sanskrit Research 2020; 6(1): 58-60

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(1): 58-60
© 2020 IJSR
www.anantaajournal.com
Received: 01-11-2019
Accepted: 04-12-2019

**Dr. Ashok Kumar Varma Konda**
MBBS, MD Chief Medical Officer
Sri. H.K.V.P. Trust Hospital
Guntur, Andhra Pradesh, India

**Advaita Vedanta**
M.Phil, Ph.D., Chief Medical Officer Sri. H.K.V.P. Trust Hospital Guntur, Andhra Pradesh, India

**Corresponding Author:**
**Dr. Ashok Kumar Varma Konda**
MBBS, MD Chief Medical Officer
Sri. H.K.V.P. Trust Hospital
Guntur, Andhra Pradesh, India

# पञ्चदश्यां भगवद्गीता विचार

**Dr. Ashok Kumar Varma Konda and Advaita Vedanta**

## प्रस्तावना

सर्वेषु प्रकरणग्रन्थेषु वेदान्तपञ्चदशी नामकःप्रकरणग्रन्थःविशिष्टंस्थानं अर्हतीति सर्वेषां विदूषां ऐकमत्यमेवेति संप्रतिपन्नोऽयंविषयः। विवेकपञ्चक, दीपपञ्चक, आनन्दपञ्चकात्मक पञ्चदशप्रकरणात्मकोऽयं ग्रन्थः पञ्चदशप्रकरणान्यस्मिन्ग्रन्थे सन्तीति “पञ्चदशी” इति विख्यातः । अस्मिन् ग्रन्थे तत्तत्प्रकरणनामानुसारेण विषयविवेचनपुरस्सरं तत्तद्विषयसंबन्ध्द अवान्तर विषयनिरूपणं सोदाहरणं हृदयंगमञ्च विद्यारण्यस्वामिभिः अनुष्टुप्छन्दोमय्यावाण्या कृतमस्ति ।

यथा तत्वदीपप्रकरणे ज्ञानस्य नित्यत्वनिरूपणं, ज्ञानस्य आत्मत्वपरमानन्दत्वनिरूपणं, परब्रह्माभिन्नत्व निरूपणं इत्यादि । एवं महाभूत विवेक ---पञ्चकोश विवेकादि तत्तन्मानुसारेण विषयनिरूपणं कृतमिति ग्रन्थाध्येतृणां स्पस्टं प्रतिभाति ।

प्रकृत पत्रलेखनस्य विषयस्तु “स्वीयसोधप्रबनथः --- भगवद्गीता च” इति । मया शोधप्रबन्ध निर्माणार्थं स्वीकृतः परिशीलनीयस्य ग्रन्थो भवति “पञ्चदशी” । तत्र स्मृतिप्रस्थानरूपायाः भगत्गीतायाः प्रमाणत्वेन बहुत्र वद्यारण्यस्वामिभिः स्वप्रतिपाद्य वेदान्त विषय संपादनार्थं उदाहृतं वर्तते । तदत्र किञ्चित्प्रस्तूयते । पञ्चदश्याः सप्तमं प्रकरणं भवति तृप्तिदीपप्रकरणम् इति । इदं प्रकरणं तत्वज्ञानस्य फलं तृप्तिरेव इति निरूपयितुं---

आत्मानं चेद्विजानीयादयमस्मीति पूरुषः ।
किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेत् ।।७.१।। [1]

इति बृहदारण्यक श्रुतिवाक्यार्थं व्याख्यातुं प्रवृत्तं विद्यारण्यस्वामिभिः । तदवसरे वाक्यगत पुरुषशब्दार्थ विचारः, अस्मीति शब्दार्थविचारः, इत्यादिनाम्ना विचार्य चिदाभासस्य सप्तावस्था विवरणं---

स्वप्रकाशे कुतोऽविद्या तां विना कथमावृतिः।
इत्यादितर्कजालानि स्वनुभूतिर्ग्रसत्यसौ ॥६.२८॥ [2]

इति निरूप्य विपरीतभावना प्रदर्शनपूर्वकं तन्निवृत्युपायं–

बहुजन्मदृढाभ्यासाद्देहादिष्वात्मधीः क्षणात् ।
पुनःपुनरुदेत्येवं जगत्सत्यत्वधीरपि ॥७.१०३॥ [3]
विपरीता भावनेयमैकाग्रयात्सा निवर्तते ।
तत्त्वोपदेशात्प्रागेव भवत्येतदुपासनात् ॥७.१०४॥ [4]
उपास्तयोऽत एवात्र ब्रह्मशास्त्रेऽपि चिन्तिताः ।
प्रागनभ्यासिनः पश्चाद्ब्रह्माभ्यासेन तद्भवेत् ॥७.१०५॥ [5]

इति प्रदर्श्य तत्र ब्रह्माभ्यासः कीदृशः इति विचिकित्सायां ब्रह्माभ्यासप्रकारं निरूपयति ।

तच्चिन्तनं तत्कथनमन्योन्यं तत्प्रबोधनम् ।
एतदेकपरत्वं च ब्रह्माभ्यासं विदुर्बुधाः ॥७.१०६॥ [6]

इति अस्य अयमर्थ । तच्चिन्तनं नाम मनसि परब्रह्मणः तदुपपादकवाक्यसहायेन पौनःपुण्येन मननं, तत्कथनं स्वन्यूनेभ्यः तत्स्वरूप व्याख्यानं, अन्योन्यं तत्प्रबोधनं नाम गुरुजनैः वा परस्परं संवादकपूर्वकं परमात्मनः प्रकर्षेणावगमनम् एतदेकपरत्वं नाम एतस्मिन्ने– वाभिमुख्येन आसक्तिः । इदं ब्रह्माभ्यासमिति बुधाः विदुः इत्यर्थः । आस्मिन् ब्रह्माभ्यास निरूपण प्रसंगे भगवतः श्री कृष्णस्य उक्तिं विद्यारण्यस्वामिनः प्रमाणत्वेन उदाहरन्ति स्वग्रन्थे––

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥७.१०८॥ [7] इति

अस्य श्लोकस्य पञ्चदशी ग्रन्थे विद्यारण्य उदाहृतस्य रामकृष्ण व्याख्या एवमस्ति ये जना अनन्या अहंब्रह्मास्मीति ज्ञानेन मदभिन्नाः सन्तस्तथैव मां चिन्तयन्तः पर्युपासते परितः सर्वेष्वपि कालेषु उपासते मद्रूपा एव वर्तन्ते तेषां नित्याभियुक्तानां सदा मच्चित्तानां तेषां अहं तदात्मत्वेन अनुसंधीयमानोऽहं योगक्षेमं अलब्धप्रापणलब्धपरिरक्षणरूपौ योगक्षेमौ वहामि । संपादयामीत्यर्थः । इति। लिङ्गनसोमयाजि कृत कल्याणपीयूष व्याख्याऽपि एवमेव अर्थं ब्रह्माभ्यासपरतया वर्णयति ।
एवं ब्रह्माभयासस्य गीता प्रामाण्यं प्रदर्श्य ब्रह्माभ्यासस्य भोजनादिवत् दृषटफलकतया कालादि नियमाभावं निर्धार्य जपध्यानादिषु कालनियमानुसरणं आवस्यकमिति निरूपयन्ति वद्यारणय श्रीचरणाः ।

नियमेन जपं कुर्यादकृतौ प्रत्यवायतः ।
अन्यथाकरणेऽनर्थः स्वरवर्णविपर्ययात् ॥७.११६॥ [8]

इति अस्मिन् संदर्भे ध्यानस्याऽपि ब्रह्माभ्यासस्येव (एतदेक परत्वरूपस्य ब्रह्माभ्यासस्य ध्यानस्ये इत्यर्थः) निर्बन्धः (नियमः) मास्तु इत्याशङ्क्य ब्रह्माभ्यासरूप ध्यानस्य तद्व्यतिरिक्त ध्यानस्य च वैलक्षण्यं प्रदर्शयति ।

मूर्तिप्रत्ययसान्तत्यमन्यानन्तरितं धियः ।
ध्यानं तत्रातिनिर्बन्धो मनसश्चञ्चलात्मनः ॥७.११९॥ [9] इति

अत्र प्रतिपादितस्य मनश्चाचल्यस्य अर्जुनमुखेन गीता (६.३४) संवादं प्रदर्शयन्ति विद्यारणयस्वामिणः ।

चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम् ।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥७.१२०॥ [10] इति

एवं तृप्तिदीपप्रकरणे ज्ञानिनः प्रारब्धानुभव विचारप्रसंगे प्रारब्ध कर्माणुसारेण ज्ञानिनोऽपि प्रवृत्तिः अपरिहार्य इतिचेत् तथा सति प्रवृत्यानुकूलाइच्छाऽपि अपरिहार्या भवेत् । इच्छापूर्वक प्रवृत्तिः रागपूर्विकेवेति कथं ज्ञानिनः न बन्धकत्वं इत्याशङ्क्य तदुत्तरत्वेन वदति–

प्रारब्धकर्मप्राबल्याद्भोगेष्विच्छा भवेद्यति ।
क्लिश्यन्नेव तदाप्येष भुङ्क्ते विष्टिगृहीतवत् ।।७,१४३।। [11] इति

तत् प्रसंगे इचच्छायाः त्रैविध्यं तन्निमित्त प्रारब्धत्रैविघ्यं च निरूपयन्ति विद्यारणयस्वामिनः ।

नैष दोषो यतोऽनेकविधं प्रारब्धमीक्ष्यते।
इच्छानिच्छा परेच्छा च प्रारब्धं त्रविधं स्मृतम् ।।७,१५२।। [12]

अस्य अयमर्थः दोषदर्शने सत्यपि इच्छया भोगप्रदं, अनिच्छया भोगप्रदं , परेच्छया भोगप्रदं चेति भोगप्रदं प्रारब्धंकर्म त्रिविधं भवति इत्यर्थः । अस्मिन् विषये (त्रविधप्रारब्ध विषये) भगवद्गीता संवादं प्रदर्शयन्ति वद्यारण्यस्वामिनः ।

सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि ।
प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ।।७.१५५।। [13]

एवं अनिच्छा प्रारब्धविषयेऽपि विद्यरण्याश्रीचरणाः भगवत्गीतां(३.३७) आश्रयन्ति। तथाहि---

न चेश्वरत्वमीशस्य हीयते तावता यतः ।
अवश्यंभाविताप्येषामीश्वरेणैव निर्मिता ।।७.१५७।। [14]
प्रश्नोत्तराभ्यामेवैतद्गम्यतेऽर्जुनकृष्णयोः ।
अनिच्छापूर्वकं चास्ति प्रारब्धमिति तच्छृणु ।।७.१५८।। [15]
अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः ।
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ।।७.१५९।। [16]
काम एष क्रोध एष रजोगुणसमुद्भवः ।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ।।७.१६०।। [17]

एवं विद्यारणयस्वामिनः तृप्तिदीपप्रकरणे प्रारब्धकर्म निरूपणावसरे गीताप्रामाण्यं स्वोक्तविषये निरूपयति । अन्यत्रच लोकानुग्रहधियाऽज्ञानिनां शिक्षणाय तन्मध्ये तिष्ठन् ज्ञान्यपि प्रवृत्तिमनुवर्तते स्वस्य तु कृतार्थत्वान्न किमपि कर्तव्यमिति प्रतिपाद्यन्ति ।

विद्वांश्चेत्तादृशां मध्ये तिष्ठेत्तदनुरोधतः ।
कायेन मनसा वाचा करोत्येवाखिलाः क्रियाः ।।७.२८५।। [18] इति

अयं श्लोकः भगवदुपदेशरूपस्य "लोकसंग्रहमेवापि संपश्यन् कर्तुमर्हसि" (गी ३.२०) इति गीताश्लोकार्थसार संग्रहरूपः इति व्याख्याकारः वर्णयन्ति ।
एवं "पञ्चदशी" ग्रन्थः साक्षात् परंपरया च गीताशास्त्र प्रतिपाद्य प्रमेयान् प्रतिपादयतीति यथामति निरूप्य विरम्यते ।।

संदर्भ


1. पञ्चदशी,त्रुप्तिदीप प्रकरणम् (पञ्च.त्रु.प्र.)
2. (पञच.त्रु.प्र.)
3. (पञच.त्रु.प्र.)
4. (पञच.त्रु.प्र.)
5. (पञ्च.त्रु.प्र.)
6. (पञ्च.त्रु.प्र.)
7. भगवत् गीता 9th chapter(भ.गी.9-22)
8. (पञ्च.त्रु.प्र.)
9. (पञ्च.त्रु.प्र.)
10. (पञ्च.त्रु.प्र.)
11. (पञ्च.त्रु.प्र.)
12. (पञ्च.त्रु.प्र.)
13. (पञ्च.त्रु.प्र.)
14. (पञ्च.त्रु.प्र.)
15. (पञ्च.त्रु.प्र.)
16. (पञ्च.त्रु.प्र.)
17. (पञ्च.त्रु.प्र.)
18. (पञ्च.त्रु.प्र)